व्याकरण

1607

क्र.नं. 32 ५०

अध्याय ८

# अष्टाध्यायी

वि. का. राजवाडे संशोधन मंडळ
क्रमांक...... 32
हस्त लिखित ग्रंथ संग्रह.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

सू॰ पा॰

१ ॥श्रीगणेशायनमः॥हरिःओम्म्॥ येनाक्षरसमाम्नायममधिग
महेश्वरात्॥कृत्स्नंव्याकरणंप्रोक्तंतस्मैपाणिनयेनमः॥१॥येनधौता
गिरःपुंसांविमलैःशब्दवारिभिः॥तमश्चाज्ञानजंभिन्नंतस्मैपाणिन
येनमः॥२॥अइउण्।ऋऌक्।एओङ्।ऐऔच्।हयवरट्।लण्।ञ
मङणनम्॥झभञ्।घढधष्।जबगडदश्।खफछठथचटतव्।क
पय्।शषसर्।हल्॥इतिप्रत्याहारसूत्राणि॥ओम्॥वृद्धिरादैच्।
अदेङ्गुणः॥इकोगुणवृद्धी।नधातुलोपआर्धधातुके।क्ङितिच।दी
धीवेवीटां॥हलोनंतराःसंयोगः।मुखनासिकावचनोनुनासिकः॥तु १
ल्यास्यप्रयत्नंसवर्णं॥नाज्झलौ।ईदूदेद्द्विवचनंप्रगृह्यं॥अदसोमात्

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(1A)

।३।निपात एकाजनाङ्।ओत्।संबुद्धौ शाकल्यस्येतावनार्षे।उञः॥ऊँ ई
दूतौ च सप्तम्यर्थे।दादाध्वदाप्॥१॥आद्यंतवदेकस्मिन्॥तरतमपौ घः
।बहुगणवतुडतिसंख्या॥ष्णांता षट्।डति च।क्तक्तवतू निष्ठा।सर्वादी
नि सर्वनामानि॥विभाषा दिक्समासे बहुव्रीहौ न बहुव्रीहौ॥तृतीयास
मासे द्वंद्वे च।विभाषा जसि।प्रथमचरमतयाल्पार्ध कतिपयनेमाश्च
।पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां॥स्वमज्ञा
तिधनाख्यायां॥अंतरं बहिर्योगोपसंव्यानयोः॥स्वरादिनिपातमव्ययं॥
तद्धितश्चासर्वविभक्तिः कृन्मेजंतः॥क्त्वातोसुन्कसुनः॥२॥अव्ययी
भावश्च॥शि सर्वनामस्थानं।सुडनपुंसकस्य।न वेति विभाषा।इग्यणः

(2)

सू॰ पा॰ २

संप्रसारणं॥ आद्यंतौ टकितौ॥ मिदचोंत्यात्परः। एच इग्घ्रस्वादेशे॥ षष्ठीस्था
योगा॥ स्थानेंतरतमः॥ उरण्रपरः॥ अलोंत्यस्य॥ ङिच्च॥ आदेः परस्य॥ अने
कालुशित्सर्वस्य॥ स्थानिवदादेशोनल्विधौ॥ अचः परस्मिन्पूर्वविधौ॥ नप
दांतद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु॥ द्विर्वचने
चि॥ अदर्शनंलोपः॥ ३ ॥ प्रत्ययस्यलुक्श्लुलुपः॥ प्रत्ययलोपेप्रत्ययल
क्षणं॥ नलुमतांगस्य॥ अचोंत्यादिटि॥ अलोंत्यात्पूर्वउपधा॥ तस्मिन्निति
निर्दिष्टेपूर्वस्य॥ तस्मादित्युत्तरस्य॥ स्वंरूपंशब्दस्याशब्दसंज्ञा॥ अणु
दित्सवर्णस्यचाप्रत्ययः॥ तपरस्तत्कालस्य॥ आदिरंत्येनसहेता॥ येन २
विधिस्तदंतस्य॥ वृद्धिर्यस्याचामादिस्तद्वृद्धं॥ त्यदादीनिच॥ एङ्प्राचां

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(2A)

देशे ॥४॥ वृधिराघंतवदव्ययीभावः प्रत्ययस्यलुक्पंचदश ॥ इतिप्र
थमाध्यायस्यप्रथमपादः ॥१॥ ॐ म् ॥ गाङ्कुटादिभ्योञ्णिङित् ॥
विभाषोर्णोः ॥ विजइट् सार्वधातुकमपित् ॥ असंयोगाल्लिट्कित् ॥
इंधिभवतिभ्यांच ॥ मृडमृदगुधकुषक्लिशवदवसःक्त्वा ॥ रुदविदमुष
ग्रहिस्वपिप्रछःसंश्च ॥ इकोझल् ॥ हलंताच्च ॥ लिङ्सिचावात्मनेपदेषु
॥ उश्च ॥ वागमः ॥ हनःसिच् ॥ यमोगंधने ॥ विभाषोपयमने ॥ स्थाघ्वोरि
च्च ॥ नक्त्वासेट् ॥ निष्ठाशीङ्स्विदिमिदिक्ष्विदिधृषः ॥ मृषस्तितिक्षा
यां ॥१॥ उदुपधाद्भावादिकर्मणोरन्यतरस्यां ॥ पूङःक्त्वाच ॥ नोपधा
त्थफांताद्वा ॥ वंचिलुंच्यृतश्च ॥ तृषिमृषिकृशेःकाश्यपस्य ॥ रलोव्यु

(3)

सू॰पा॰ ३

प्रधाद्युत्पदे॰संश्च।ऊकालोज्झस्वदीर्घप्लुतः॥अचश्च।उच्चैरुदात्तः॥नीचैरनु
नुदात्तः॥समाहारःस्वरितः॥तस्यादितउदात्तमर्धह्रस्वं।एकश्रुतिदूरात्सं
बुधौ।यज्ञकर्मण्यजपन्यूंखसामसु॥उच्चैस्तरांवावषट्कारः॥विभाषाछंदसि
।नसुब्रह्मण्यायांस्वरितस्यतूदात्तः।देवब्रह्मणोरनुदात्तः।स्वरितात्संहि
तायामनुदात्तानां।उदात्तस्वरितपरस्यसंनतरः॥२॥अपृक्तएकाल्प्र
त्ययः।तत्पुरुषःसमानाधिकरणःकर्मधारयः।प्रथमानिर्दिष्टंसमासउप
सर्जनं॥एकविभक्तिचापूर्वनिपाते।अर्थवदधातुरप्रत्ययःप्रातिपदिकं
कृत्तद्धितसमासाश्च।ह्रस्वोनपुंसकप्रातिपदिकस्यगोस्त्रियोरुपसर्जन ३
स्य॥लुक्तद्धितलुकि।इद्गोण्याः।लुपियुक्तवद्व्यक्तिवचने।विशेषणानांचा

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3A)

जातेः।तदशिष्यंसंज्ञाप्रमाणत्वात्।।लुब्योगाप्रख्यानात्।।योगप्रमाणे
चतदभावेदर्शनंस्यात्।।प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमा
णत्वात्।कालोपसर्जनेचतुल्यं।जात्याख्यायामेकस्मिन्बहुवचनम
न्यतरस्यां।।अस्मदोद्वयोश्च।फल्गुनीप्रोष्ठपदानांचनक्षत्रे।।३।।छंद
सिपुनर्वस्वोरेकवचनं।विशाखयोश्च।तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वेबहुव
चनस्यद्विवचनंनित्यं।सरूपाणामेकशेषएकविभक्तौ।वृद्धोयूना
तल्लक्षणश्चेदेवविशेषः।।स्त्रीपुंवच्च।पुमान्स्त्रिया।।भ्रातृपुत्रौस्वसृदु
हितृभ्यां।।नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यां।पितामात्रा।।श्व
शुरश्वश्र्वा।।त्यदादीनिसर्वैर्नित्यं।।ग्राम्यपशुसंघेष्वतरुणेषुस्त्री।।४।।

Joint project of the Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai

(५)

सू० पा०

४

गाङ्कुटाद्युधुपधादपृक्तच्छंदसिपुनर्वस्वोरुभयोर्दृशः।।इतिप्रथमाध्याय
स्यद्वितीयपादः।।ॐ भूवादयोधातवः।उपदेशे।इतिप्रथमाध्यायस्यद्वि
तीयपादः।।जेनुनासिकइत्कइकू।।हलंत्यं।नविभ[redacted]क्तौतुस्माः।।आदि
र्भिटटवः।।षःप्रत्ययस्य।चुटू।लशक्वतद्धिते।तस्यलोपः।यथासंख्यम
नुदेशःसमानां।।स्वरितेनाधिकारः।।अनुदात्तङितआत्मनेपदं।भावकर्म
णोः।कर्त्तरिकर्मव्यतिहारे।नगतिहिंसार्थेभ्यः।इतरेतरान्योन्योपपदाच्चे
र्विशः।परिव्यवेभ्यःक्रियः।विपराभ्यांजेः।।आङोदोनास्यविहरणे।।१।।
क्रीङोनुसंपरिभ्यश्च।।समवप्रविभ्यस्थः।।प्रकाशनस्थेयाख्ययोश्च।उदो ४
नूर्ध्वकर्मणि।उपान्मंत्रकरणे।।अकर्मकाच्च।उद्विभ्यांतपः।आङोयम

Joint project of Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai.

(५A)

हनः।समोगम्यृछिप्रछिस्वरत्यर्तिश्रुविदिभ्यः।निसमुपविभ्योह्वः॥स्पर्धा
यामाङः।गंधनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषुकृ
ञः॥अधेःप्रसहने।वेःशब्दकर्मणः।अकर्मकाच्च॥सम्माननोत्संजनाचार्य
करणज्ञानभृतिविगणनव्ययेषुनियः॥कर्तृस्थेचाशरीरेकर्मणि॥वृत्तिसर्ग
तायनेषुक्रमः॥उपपराभ्यां॥आङउद्गमने।२०॥वेःपादविहरणे।प्रोपाभ्यां
समर्थाभ्यां।अनुपसर्गाद्वा॥अपन्हवेज्ञः॥अकर्मकाच्च॥संप्रतिभ्यामेल
नाध्याने॥भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषु॥वदः।व्यक्तवाचां
समुच्चारणे।अनोरकर्मकात्॥विभाषाविप्रलापे।अवाद्ग्रः।समःप्रतिज्ञाने।
उदश्चरःसकर्मकात्॥समस्तृतीयायुक्तात्॥दाणश्चसाचेच्चतुर्थ्यर्थे।उपा

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5)

सू०पा० ५

यमःस्वकरणे।ज्ञाश्रुस्मृदृशांसनः।।नानोर्ज्ञः।प्रत्याङ्भ्यांश्रुवः।शदेःशि
तः।।३।।म्रियतेर्लुङ्लिङोश्च।पूर्ववत्सनः।।आम्प्रत्ययेवत्कृञोनुप्रयोगस्य
।प्रोपाभ्यांयुजेरयज्ञपात्रेषु।समःक्ष्णुवः।भुवने।।णेरणौयत्कर्मणौचेत्स
कर्त्तानाध्याने।।भीस्म्योर्हेतुभयगृधिवंच्योःप्रलंभने।लियःसंमाननशाली
नीकरणयोश्च।।मिथ्योपपदात्कृञोभ्यासे।स्वरितञितःकर्त्रभिप्रायेक्रिया
फले।अपाद्वदः।णिचश्च।समुदाङ्भ्योयमोग्रंथे।अनुपसर्गाज्ज्ञः।विभाषो
पपदेनप्रतीयमाने।शेषात्।कर्त्तरिपरस्मैपदं।।अनुपराभ्यांकृञः।अभिप्रत्य
तिभ्यःक्षिपः।।४।।प्राद्वहः।परेर्मृषः।व्याङ्परिभ्योरमः।।उपाच्च।।विभाषा ५
कर्मकात्।चित्तवत्कर्त्तृकात्।नपादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदव

(5A)

सः।बाक्यषः॥घुन्थ्यो लुङि।वृन्थ्यस्यस्य सनोः।लुटि चक्लृपः॥५॥भूवाद

यः क्रीडेनुवेः पादेष्वयते ग्राद्धहस्त्रयोदश।इति प्रथमाध्यायस्य तृतीयपादः॥

अं आकउआरादेकासंज्ञा॥विप्रतिषेधे परं कार्यं॥यूस्त्र्याख्यो नदी।नेयुवु कश्च

स्यानावस्त्री।वामि॥ङिति ह्रस्वश्च।शेषोध्यसखि।पतिः समासएव।षष्ठीयु

क्तछंदसिवा॥ह्रस्वंलघु।संयोगेगुरु।दीर्घं च।यस्मात्प्रत्ययाविधिस्तदादि प्र

त्ययेगं।स्क प्तिङं तंपदं।नःक्ये।सिति च।स्वादि ष्वसर्वनामस्थाने।यचि भं।

तसौमत्वर्थे॥अयस्मयादीनि छंदसि॥९॥बहुषु बहुवचनं।द्व्येकयोर्द्विव

चनैकवचने॥कारके।ध्रुवमपायेपादानं।भीत्रार्थानांभयहेतुः॥पराजे

रसोढः।वारणार्थानामीप्सितः।अंतर्धौयेनादर्शनमिच्छति।आख्याता

(८)

सू॰ पा॰ ६

पयोगे।जनिकर्तुःप्रकृतिः।भुवः।प्रभवः।कर्मणायमभिप्रैतिससंप्रदानं।रुच्य
र्थानांप्रीयमाणः।श्लाघन्हुङ्स्थाशपांज्ञीप्स्यमानः।धारेरुत्तमर्णः।स्पृहेरीप्सि
तः।क्रुधद्रुहेर्ष्यासूयार्थानांयंप्रतिकोपः।क्रुधद्रुहोरुपसृष्टयोःकर्म।।राधी
क्ष्योर्यस्यविप्रश्नः।।प्रत्याङ्भ्यांश्रुवःपूर्वस्यकर्त्ता।।२।।अनुप्रतिगृणश्च।।सा
धकतमंकरणं।दिवःकर्मच।।परिक्रयणेसंप्रदानमन्यतरस्यां।।आधारो
धिकरणं।अधिशीङ्स्थासांकर्म।अभिनिविशश्च।।उपान्वध्याङ्वसः।कर्तु
रीप्सिततमंकर्म।तथायुक्तंचानीप्सितं।अकथितंच।।गतिबुद्धिप्रत्यवसा
नार्थशब्दकर्माकर्मकाणामणिकर्त्तासणौ।हृक्रोरन्यतरस्यां।स्वतंत्रःक ६
र्त्ता।तत्प्रयोजकोहेतुश्च।प्राग्रीश्वरान्निपाताः।चादयोसत्वे।प्रादयःउपसर्गाः

(6A)

क्रियायोगे ।गतिश्च ।।३ ।।ऊर्यादिच्विडाचश्च ।अनुकरणंचानितिपरं ।आ
दरानादरयोः सदसती ।भूषणेलं ।अंतरपरिग्रहे ।कणेमणसीश्रद्धाप्रतीघा
ते ।पुरोव्ययं ।अस्तंच ।अच्छगत्यर्थवदेषु ।अदोनुपदेशे ।तिरोंतर्धौ ।विभा
षाकृञि ।उपाजेन्वाजे ।साक्षात्प्रभृतीनि ।अनत्याधानउरसीमनसी ।म
ध्येपदेनिवचनेनच ।नित्यंहस्तेपाणावुपयमने ।प्राध्वंबंधने ।जीविकोपनिषदा
वौपम्ये ।ते प्राग्धातोः ।।४।।छंदसिपरेपि ।व्यवहिताश्च ।कर्मप्रवचनीयाः ।
अनुर्लक्षणे ।तृतीयार्थे ।हीने ।उपोधिकेच ।अपपरीवर्जने ।आङ्मर्यादाव
चने ।लक्षणेत्थंभूताख्यानभागवीप्सासुप्रतिपर्यनवः ।अभिरभागे ।प्रतिः
प्रतिनिधिप्रतिदानयोः ।अधिपरीअनर्थकौ ।सुः पूजायां ।अतिरतिक्रमणेच

(7)

सू० पा० अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु ।अधिरीश्वरे।।विभाषाकृञि
७ लः परस्मैपदं। तङानावात्मनेपदं ।।५।। तिङस्त्रीणि त्रीणि प्रथममध्यमोत्त
माः। तान्येकवचनद्विवचनबहुवचनान्येकशः। सुपः विभक्तिश्च ।। युष्मद्युप
पदे।।समानाधिकरणेस्थानिन्यपिमध्यमः।।प्रहासे च मन्योपपदे मन्यतेउत्तरु
त्तमएकवच्च।। अस्मद्युत्तमः। शेषेप्रथमः।परः संनिकर्षः संहिता।विरामो
वसानं।।६।।आकडाराद्धुधनुप्रातिगणडूर्यादिछंदसितिङोदश।।इतिप्र
थमोध्यायः समाप्तः।।हरिः ओम् समर्थः पदविधिः।।सुबामंत्रितेपराङ्गस्व
ङ्ः वत्स्वरे।प्राक्कडारात्समासः।।सहसुपा।अव्ययीभावः।अव्ययं विभक्तिस ७
मीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौग

Rajwade Sanshodhan Mandal, Dhule and the Yeshwantrao Chavan Pratishthan, Mumbai.

(7A)

पद्यसादृश्यसंपत्तिसाकल्यांतवचनेषु ।यथासादृश्योयाव दवधारणे ॥
स्कंप्रतिनामात्रार्थे।अक्षशलाकासंख्याःपरिणा॥विभाषाअपपरिबहि
रंचवः पंचम्या॥आङ्मर्यादाभिविध्योः।लक्षणेनाभिप्रतिआभिमुख्ये
।अनुर्यत्समया॥यस्यचायामः तिष्ठद्गुप्रभृतीनिच॥पारेमध्येषष्ठ्यावा॥संख्या
वंश्येन।नदीभिश्च॥(२)॥अन्यपदार्थेवसंज्ञायां॥तत्पुरुषः।द्विगुश्च॥द्वितीया
श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः।स्वयंक्तेन।खट्वाक्षेपे।सामि
।कालाः।अत्यंतसंयोगेच॥तृतीयातत्कृतार्थेनगुणवचनेन।पूर्वसदृशस
मोनार्थकलहनिपुणमिश्रश्लक्ष्णैः।कर्तृकरणेकृताबहुलं।कृत्यैराधि
कार्थवचने।अन्नेनव्यंजनं।भक्ष्येणमिश्रीकरणं।चतुर्थीतदर्थार्थबलि

(४)

सू॰ पा॰ ८

हितसुखरक्षितैः॥पंचमीभयेन।अपेतापोढमुक्तपतितापत्रस्तैरल्प
शः॥स्तोकांतिकदूरार्थकृच्छ्राणिक्तेन।सप्तमीशौंडैः॥२॥सिद्धशुष्क
पक्वबंधैश्च।ध्वांक्षेण क्षेपे।कृत्यैर्ऋणे।संज्ञायां क्तेन।अहोरात्रावयवाः॥
तत्र।क्षेपे।पात्रेसंमितादयश्च।पूर्वकालैकसर्वजरत्पुराणनवकेवलाः
समानाधिकरणेन।दिक्संख्ये संज्ञायां।तद्धितार्थोत्तरपदसमाहारे
च॥संख्यापूर्वो द्विगुः।कुत्सितानि कुत्सनैः॥पापाणके कुत्सितैः॥उ
पमानानि सामान्यवचनैः॥उपमितं व्याघ्रादिभिः सामान्याप्रयोगे॥
विशेषणं विशेष्येण बहुलं॥पूर्वापरप्रथमचरमजघन्यसमानमध्यम
ध्यमवीराश्च।श्रेण्यादयः कृतादिभिः।क्तेन नञ्विशिष्टेनानञ्॥३॥

(8A)

सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः।वृंदारकनागकुंजरैः पूज्यमानं।
कतरकतमौ जातिपरिप्रश्ने।किंक्षेपे।षोटायुवतिस्तोककतिपयगृ
ष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्त्तैर्जातिः।।प्रशंसा
वचनैश्च।।युवाखलतिपलितवलिनजरतीभिः।।कृत्यतुल्याख्या अजा
त्या।।वर्णोवर्णेन।।कुमारःश्रमणादिभिः।चतुष्पादोगर्भिण्या।।मयूरव्यं
सकादयश्च।।८।।समर्थोन्यपदार्थेसिद्धक्षुष्ठकसन्महद्वाहशा।।इतिद्विती
याध्यायस्यप्रथमपादः।।ॐ।।पूर्वापराधरोत्तरमेकदेशिनै।।काधिकर
णे।।अर्धंपुंसकं।द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्यां।।प्राप्तापन्नेचद्वि
तीयया।।कालाः।परिमाणिना।।नञ्।ईषदकृता।षष्ठी।याजकादिभिश्च

(१)

सू॰ पा॰ १

ननिर्धारणे॥पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेनक्तेन
चपूजायां।अधिकरणवाचिनाचकर्मणिच॥तृजकाभ्यांकर्तरि॥कर्त्तरि
चानित्यंक्रीडाजीविकयोः।कुगतिप्रादयः।उपपदमतिङ्॥अमैवाव्ययेन
॥१॥तृतीयाप्रभृतीन्यन्यतरस्यां।क्त्वाच॥शेषोबहुव्रीहिः।अनेकमन्यप
दार्थे।संख्ययाव्ययासन्नादूराधिकसंख्याःसंख्येयेदिङ्नामान्यंतराले।
तत्रतेनेदमितिसरूपे।तेनसहेतितुल्ययोगेचार्थेद्वंद्वः।उपसर्जनंपूर्वं।रा
जदंतादिषुपरं।द्वंद्वेघि।अजाद्यदंतं।अल्पाच्तरं।सप्तमीविशेषणेबहुव्रीहौ॥नि
ष्ठेवाहिताग्न्यादिषु॥कडारकर्मधारये॥२॥इतिद्वितीयाध्यायस्यद्वितीय
पादः॥ॐम्॥पूर्वापराधरोत्तरंतृतीयाप्रभृतीन्यष्टादश।हरिःॐम्॥ १

(9A)

अनभिहिते कर्मणि द्वितीया॥ तृतीयाबहुलंछंदसि। अंतरांतरेणयुक्ते। का
लाध्वनोरत्यंतसंयोगे। अपवर्गे तृतीयासप्तमीपंचम्यौ कारकमध्ये॥ कर्म
प्रवचनीययुक्ते द्वितीया। यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी॥ पंच
म्यपाङ्परिभिः। प्रतिनिधिप्रतिदाने च यस्मात्। गत्यर्थकर्मणि द्वितीया। च
तुर्थ्यौ चेष्टायामनध्वनि। चतुर्थी संप्रदाने। क्रियार्थोपपदस्य च कर्मणि स्था
निनः॥ तुमर्थाच्च भाववचनात्॥ नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च॥ म
न्यकर्मण्यनादरे विभाषाप्राणिषु॥ कर्तृकरणयोस्तृतीया॥ सहयुक्तेप्रधा
ने। येनांगविकारः॥ १ ॥ इत्थंभूतलक्षणे॥ संज्ञोन्यतरस्यांकर्मणि॥ हेतौ॥
अकर्तर्यृणेपंचमी॥ विभाषागुणेस्त्रियां॥ षष्ठीहेतुप्रयोगे॥ सर्वनाम्नस्तृ

(१०)

सू०पा० तीयाच॥अपादानंपंचमी।अन्यारादितरर्त्तेदिक्छब्दांचूत्तरपदाजाहियुक्ते
१० षष्ठ्यतसर्थप्रत्ययेन।एनयाद्वितीया।पृथग्विनानानाभिस्तृतीयान्यतरस्यां
करणेचस्तोकाल्पकृच्छ्रकतिपयस्यासत्ववचनस्य।दूरांतिकार्थैःषष्ठ्यन्यत
रस्यां।दूरांतिकार्थेभ्योद्वितीयाच॥सप्तम्यधिकरणेच।यस्यचभावेनभावलक्ष
णं॥षष्ठीचानादरे॥स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च।आयु
क्तकुशलाभ्यांचासेवायां॥(२)यतश्चनिर्धारणं॥पंचमीविभक्ते।साधुनिपुणा
भ्यामर्चायांसप्तम्यप्रतेः॥प्रसितोत्सुकाभ्यांतृतीयाच॥नक्षत्रेचलुपि।प्राति १०
पदिकार्थलिंगपरिमाणवचनमात्रेप्रथमा॥संबोधनेच॥सामंत्रितं।एकवच
नंसंबुद्धिः।षष्ठीशेषे।ज्ञोविदर्थस्यकरणे।अधीगर्थदयेशांकर्मणि॥कृञ

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com